श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ चरमश्लोकच्युरुक्कु ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चरमश्लोकच्युरुक्कु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सम्यग्ज्ञानेन हीना यदिह च विजहुः कर्मयोगादिकांश्च
तेष्वप्यन्यास्ववस्थास्वनुगुणविधिनोपात्तसर्वक्रियासु।
सम्यग्ज्ञानाः प्रवृत्तास्स्युरपि तदबला मां ह्युपायं न्यसेयुः
एवं सर्वांश्च धर्मान् उपदिशत उपाशिश्रयामोऽङ्घ्रियुग्मम्॥ 1 ॥

आकिञ्चन्यं विदित्वा तदनु तदु पुरस्कृत्य चान्याः प्रतीकाः
नापेक्ष्या इत्यवेत्योन्नतफलमिव तत् प्राप्तुमुत्पत्य खर्वः।
खिन्नस्सन्त्यज्य तद्यप्यतिदृढचतुरास्यास्त्ररीतिं च बुध्वा
न्यस्तव्यं चैकधर्मायनमतिशयितः प्राह धर्मस्तदानीम्॥ 2 ॥

त्यक्त्वा क्षीरपयोनिधिं च मधुरां लक्ष्म्या सहागत्य तं
भूभारं त्ववतार्य भारतरणे भूत्वा च सूतः पुरा।
दूतोऽतीवभयार्तफल्गुनरथात् यस्तं ररक्ष स्वयम्
तस्यैतस्य हरेः पदाम्बुजमहादासा वयं स्मोऽधुना॥ 3 ॥

लभ्यं साधनमात्मनीनकृपया तत् साधकश्च स्वयं
प्राप्नोतीत्यपनेतुमाश्रितजनैकोपायभूतं हरिम्।
अत्यन्तस्पृहणीयया करुणया लक्ष्म्या च साकं स्तुतं
रस्योक्तिं प्रभुमभ्युपेयिम परं चेहैकवाच्यं वयम्॥ 4 ॥

देहे संयोज्य संभ्रामयति च दुरिताम्भोनिधौ मां निमग्नं
शेषत्वादीन् मदीयान् अपि च शुभगुणान् स्वानुरूपं सुमार्गम्।
कारुण्याब्धिस्स्वयं मे स्वमिह वितरितुं धर्म एवाद्वितीयः
नान्यं लप्स्ये यथेतः परमिह परमं मय्यभिस्निह्यतीशः॥ 5॥

कर्मस्वत्यन्तकृच्छ्रेष्विह पुरुषफलावाप्तिविघ्नायितेषु
स्वीकृत्याचारमस्मास्वविरतमिह तत्पूर्णविश्वासयुक्तः।
वस्त्वेतत्स्वैकरक्ष्यं न्यसनकरणतश्चैकदैवातिहृष्टः
गीताचार्यो व्रजेति श्रितमुवद तदाऽलम्भयच्चात्मपादौ॥ 6॥

वेद्यो दुर्ज्ञेयवेदैः पर इति सकलात् यस्स्वयं चाधुना स्वं
मर्त्याकारं य एवं न विदुरिह तदावेदनात्तप्रभावः।
सार्धं तैर्नित्यसङ्गैस्त्ववतरति जगत्युत्तमः पूरुषोऽहं
शब्दार्थः श्रीप्रियोऽस्मान् निजपरमपदं प्रापयत्येव भक्तान्॥ 7॥

आत्मीयां दर्शयित्वा स्थितिमतिमुदितश्चासहायान् विलोक्य
तामस्माकं ह्यपोढुं स्थितिमिह परिगृह्यात्मरक्ष्यान् प्रपन्नान्।
आत्माङ्ग्री ह्येव दातुं विविधगतियुते मूलवर्णे शताङ्गे
पार्थस्याप्यास्थितोऽस्मान् उपकृदुपगतान् स्वीचकाराद्यधर्मान्॥ 8॥

पादाभ्यां च तदा जघान शकटं यश्चाभवत्सारथिः
चक्रे न्यस्तभरांश्च नो विघटकान्यस्माकमेनांसि च।
आरण्यान्युत नारकानुत महाक्ष्वेडौघमाहोऽनलं
सोष्णां वा दुरपोढगाढतिमिरां रात्रिं समीयुर्ध्रुवम्॥ 9॥

संन्यस्तात्मीयभारात् परमिह जनितैनांसि नो मोचयित्वा
पद्धत्याऽर्चिःप्रभृत्या परमपदमसौ प्रापयन् मोदमानैः।
तत्रत्यैः नित्यमुक्तैः रमयितुमनिशं त्वद्य चेदद्य एव
श्वश्चेत् श्वश्चैव संकल्पत उरुकरुणो मोक्षयन् त्रायते नः॥ 10॥

स्वीकुर्वन् नः प्रपन्नान् धुतसकलमतीन् आत्मसंरक्षणीयान्
बन्धूत्त्यर्हान् समस्तान् स्वयमिह विधरन्नस्मदर्थं हि भूत्वा।
दुःखं माभूत् पुनर्भूकृतमिति हृदयं चाजहत्संवसंश्च
स्वामी सर्वाणि दुःखान्यतिशयकृपया भोग्ययाऽनाशयन्नः॥ **11** ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेशिकप्रबन्धस्थः चरमश्लोकसङ्ग्रहः।
सश्लोकस्सार्थतात्पर्यः कृतो गोपालसूरिणा॥

॥ इति चरमश्लोकसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥